**जिज्ञास्थि** न० अस्थ्ः जिज्ञासा राजद० परनि० सालोपश्च। अस्थिजिज्ञासायाम् ।

**जित्** त्रि० जि—क्विप्। जेतरि। "मारजित् लोकजिज्जिनः" अमरः "स्वर्जिता यजेत" "विश्वजिता यजेत" श्रुतिः। "यजेत वाश्वमेधेन स्वर्जिता गोषवेन वा" मनुः

**जित** त्रि०जि—कर्म्मणि क्त। १पराजिते २पराभूते। भावे क्त। ३जये न०। तदस्यास्ति अच्। ४अर्हदुपासकभेदे पु० हेमच०।

**जितकाशि** पु० जितः अभ्यासपटुतया दृढीकृतः काशिः मुष्टिर्येन। दृढमुष्टौ योधभेदे नीलकण्ठः।

**जितकाशिन्** त्रि० जितेन जयेन काशते प्रकाशते काश—णिनि। १जिताहवे, जयिनि हेमच०। "अनिरुद्धो रणे बाणो जितकाशी महाबलैः" हरिवं० १७७ अ०।

**जितक्रोध** त्रि० जितः क्रोधो येन। १क्रोधशून्ये २विष्णौ पु०। "मनोहरो जितक्रोधो वीरबाहुर्विदारणः" विष्णुसं० "वेदमर्य्यादां स्थापयन् असुरान् हन्ति न तु कोपवशात्" भाष्योक्तेः तस्यासुरहननाय न कोपः किन्तु वेदमर्य्यादारक्षार्थं एवेति न तस्य कोपशालितेति बोध्यम्। जितमन्युरप्युभयत्र। "अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः" विष्णुस०।

**जितनेमि** पु० जिता नेमिरत्र। आश्वत्थदण्डे हेमच०

**जितलोक** त्रि० जितः आयत्तीकृतः कर्म्मादिद्वारा लोकः स्वर्गादिर्येन। इष्टापूर्त्तादिकर्म्मभिः आयत्तीकृतस्वर्गादिलोके धार्म्मिके "स एकः पितृणां जितलोकानामानन्दः अथ ये शतं पितृणां जितलोकानामानन्दः शत० ब्रा० १४।७।१।३३। "पितृणां दक्षिणमार्गानुयायिनाम् श्राद्धपिण्डपितृयज्ञादिकर्म्मभिः पितृतोषणद्वारा जितो लोको यैस्ते यद्वा जिता लोका येषामिति जितलोकाः" भा०। २अभिभूतलोके त्रि०।

**जितवत्** त्रि० जि+क्तवतु। १कृतजये स्त्रियां ङीप् सा च उशीनरन्टपस्य २कन्यायाम्। "अस्ति मे मानुषे लोके नरदेवात्मजा सखी। नाम्ना जितवती नाम रूपयौवनशालिनी। उशीनरस्य राजर्षेः सत्यसन्धस्य धीमतः। दुहिता कथिता लोके मानुषे रूपसम्पदा" भा०आ०६६अ०

**जितव्रत** त्रि० जितमायत्तीकृतं व्रतं येन। १आयत्तीकृतव्रते पृथुवंश्ये २हविर्द्धानपुत्रभेदे पु० "हविर्धानाद्धविर्धानी विदूरासूत षट् सुतान्। बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम्" भाग० ४।२४।८।

**जितशत्रु** पु० जितः शत्रुर्येन। १पराजितरिपुके रिपुजयकर्त्तरि। २अर्हतां पितृभेदे पु० हेमच०।

**जिताक्षर** त्रि० जितानि आयत्तीकृतानि अक्षराणि शीघ्रं तद्वाचनपाटवादि येन। दृष्टिमात्रेण अक्षरवाचनशक्तियुक्ते।

**जितात्मन्** त्रि०जितो वशीकृत आत्मा इन्द्रियं मनो वा येन। १जितेन्द्रिये। २श्राद्धभागार्हे देवभेदे पु० कौर्म्मिकल्कद्रे २०६।१पृ० दृश्यम्।

**जितामित्र** त्रि० जितः अमित्रो येन। १शत्रुपराजयकर्त्तरि २जितकामादिरिपुके च। ३विष्णौ पु०शब्दरत्ना० "अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः" विष्णुस० "जिता अमित्रा आभ्यन्तरा रागद्वेषादयो बाह्या रावणादयश्च येनासौ जितामित्रः" भा०।

**जितारि** पु० जिता अरयो आभ्यन्तरा रागादयो बाह्याश्च रिपवो येन। १बुद्धे त्रिका० २इन्तार्हत्पितरि हेमच० ३जितशत्रौ शत्रुजयकारिणि ४कामादिरिपुजयकर्त्तरि च त्रि० ५अविक्षितो न्टपस्य पुत्रभेदे पु० "अविक्षितः परिक्षित्तु शबलाश्वश्च वीर्य्यवान्। आदिराजो विराजश्च शाल्मलिश्च महाबलः। उच्चैःश्रवा भङ्गकारो जितारिश्चाष्टमः स्मृतः" भा० आ० ९४ अ०।

**जिताष्टमी** स्त्री आश्विनकृष्णाष्टम्यां जीमूतवाहनपूजाद्यङ्गभूतायां जीमूताष्टम्यां तत्र कर्त्तव्यमुक्तं चमत्कारचि० भविष्योत्तरे "इषेमास्यसिते पक्षे अष्टमी या तिथिर्भवेत्। पुत्रसौभाग्यदा स्त्रीणां ख्याता सा जीवपुत्रिका। शालिवाहनराजस्य पुत्रो जीमूतवाहनः। तस्यां पूज्यः स नारीभिः पुत्रसौभाग्यलिप्सया। प्रदोषसमये स्त्रीभिः पूज्यो जीमूतवाहनः। पुष्करिणीं विधायाथ प्राङ्गणे चतुरस्रिकाम्"। विष्णुधर्म्मोत्तरे "पूर्वेद्युर परेद्युर्वा प्रदोषे यत्र चाष्टमी। तत्र पूज्यः सदा स्त्रीभिः राजा जीमूतवाहनः"। तथा च यद्दिने प्रदोषव्यापिनी अष्टमी तत्रैव व्रतम्। उभयदिने चेत् परदिने त्रिसन्ध्यव्यापित्वात्। उभयदिने प्रदोषाव्याप्तौ उदयगामिन्यां तदुक्तं निर्णयामृतस्मृतौ "लक्ष्मीव्रतं चाभ्युदिते शशाङ्के यत्राष्टमी चाश्विनकृष्णपक्षे। तत्रोदयं वै कुरुते दिनेश! तदा भवेज्जीवितपुत्रिका सा" इति अस्यामष्टम्यां स्त्रीभिर्न भोक्तव्यम् "आश्विनस्यासिताष्टम्यां याः स्त्रियोऽन्नं हि भुञ्जते। मृतवत्सा भवेयुस्ता वैधव्यञ्च भवेद्ध्रुवम्" वचनात्।